शयनभोग अरोगवेकों प्रभु पधारत हें सो निरूपण करत हें. **ठण्ठणतो** सो नूपुरके शब्द सहित अथवा नेत्रकमलमें कछु निद्रा आयी हे याते. **ठण्ठणतो** सो मंद मंद मटकत भये. **भोजनशाळाए** सो भोजनमंदिरमें **आवें** सो पधारत हें. अब भोजनशाळाए जाय ऐसे नहीं कह्यो और आवें ऐसे कह्यो याको भावार्थ यह जो गोपालदासजीकों वा समें ऐसो अनुभव भयो जो मैं भोगमंदिरमें ठाड़ो हूं यातें ऐसे कह्यो. अथवा शयनभोग सिद्ध करिके श्रीरोहिणीजी प्रभुनूकी राह देखत हें फेर जब प्रभु पधारत हें तब दर्शनानन्दको अनुभव करत हें. याहीते भोजनशाळाये आवे ऐसे कह्यो. अब वा समें प्रभु कैसे लगत हें सो कहत हें. **वालो** सो प्रिय. अब ठण्ठणते पधारत हें ताको हेतु कहत हें. **लाड़कड़ो** सो श्रीयशोदाजी नन्दरायजीके अत्यन्त लाड़िले हें. याको भावार्थ यह जो शृंगारादिक करिके श्रीयशोदाजी नन्दरायजीके लाड़के आनन्दतें पूर्ण प्रभु शयनभोग आरोगिवेको लटकत भये पधारत हें॥१३॥

(टिप्पणम्)

१.ऋतुअनुसार वस्त्राभरणादिक श्रीयशोदाजी धरावत हें. याहीतें श्रीभागवतमें **''यथाकामं यथाकालं व्यधत्तां परमाशिषः''** (भाग.पुरा.१०।१५।४४) यह कह्यो हे.

२.पुष्पकी रचना सो केशके जूड़ापें फूलकी माला धरावत हें क्यों जो गुर्जरभाषामें अंबोड़ा ऐसो जूड़ाको नाम हे. और अनेक प्रकारकी फूलन्की रचना हू करत हे.

३.अनेक वसनसुगंधनीवी या पाठमें नीवी सो पहिरवेको वस्त्र और वसन शब्द करिके दूसरे वस्त्र जानने. अब या तुकमें जो वर्णन कियो हे सो ही श्रीभागवतमें **''नीवीं वसित्वा रुचिरां दिव्यस्रग्गंधमण्डितौ''** (भाग.पुरा.१०।१५-।४५) या श्लोकमें कह्यो हे.

(भाषाटीका)

विविध सो नाना प्रकारके ऋतु अनुसार **वसन** सो बागा वस्त्र पाग पिछोरादिक और **सुगंध** सो हू **विविध** नाना प्रकारके गुलाब

केवड़ा खस प्रभृति और **नीवी** सो सूथनकी डोरी-फोंदायुक्त नाड़ा सो हू धरावत हें. और केशन्में कांगसी करिके **फूल अंबोड़े फावे** सो फूल गूंथिके अंबोड़ेसो जूड़ा बांधत हें. ता पीछे अब शयनभोगको प्रकार वर्णन करत हें. **टण्टणतो** सो नूपुरके शब्दनूको ठमकावते **व्हालो** सो प्यारो **लाड़कड़ो** सो लाड़िलो **भोजनशाळाए** सो भोजनघर तामें **आवे** सो आवत हें. अब स्वामिनीजीके अधरामृतकी अधिकतासूचक वर्णन करत हें॥१३॥

(विवृति:)

अब मातृसमर्पित शयनभोग श्रीस्वामिनीजीके अधरामृतते हू अधिक स्वाद लगत हें. यह निरूपण करिवेके लिये प्रथम श्रीस्वामिनीजीके अधरामृतको उत्कर्ष वर्णन करत हें.

राधा अधर-सुधा विना पियुने बीजुं ते कांई नव भावेजी॥
प्रात:पधारे ने निशाऐ आवे व्हालो प्रीति नवी उपजावेजी॥१४॥

(विवृति:)

राधा जे मुख्य स्वामिनीजी [1]वृषभानुजा परिनिष्ठितानन्दरूप तिनकी जो **अधरसुधा** सो अधरामृत ता बिना **हरि** जे सर्वदु:खहर्ता प्रभु तिनको **बिजु कांई नव भावे** और कछु स्वाद नहीं लगत हे. अब यहां **हरि** शब्द कह्यो यातें यह सूचन कियो जो आप सबनूके सर्व दु:खहर्ता हें तथापि आपकी हू [2]तापशांति श्रीराधाजीके अधरामृतते होत हे. याते श्रीस्वामिनीजीके अधरामृतको अत्यन्त उत्कर्ष सूचन कियो और श्रीराधाजीको मुख्य स्वामिनीपनो तो श्रीमद्भागवतमें श्रीशुकदेवजीने ''[3]**नमो नमस्ते**'' या श्लोकमें निरूपण कियो हे तथा ऋग्वेदमें हू निरूपण कियो हे. अब ऐसे प्रिय श्रीस्वामिनीजी तिनकों छोड़िके प्रभु ओर कहूं पधारत न होयेंगे तब और लीलानूकी सिद्धि कैसे होयगी यह शंका निवारण करत हें. **प्रात: पधारे** प्रात:कालके विषे गाय चरायवेको पधारत हें और **निशाये** सो रातकों शयनभोग आरोगिके

शय्यामंदिरमें श्रीस्वामिनीजीके पास पधारत हें. अब प्रभु तो सर्वसमर्थ हें तब आखो दिन विप्रयोगदु:खको अनुभव क्यों करावत हें या शंकाको निरूपण करत हें. **प्रीत नवी उपजावे** प्रतिदिन नई प्रीत उत्पन्न श्रीस्वामिनीजीके हृदयमें करत हें. याको भावार्थ यह जो विप्रयोग बिना पूर्ण संयोगसुख होत नाहीं यातें दिनकुं विप्रयोगको अनुभव करावत हें. रात्रिको परिनिष्ठित संयोगसुखको अनुभव करावत हें और प्रथम गोष्ठलीलामें [4]अपरिनिष्ठितानन्दको हू निरूपण कियो हे याहीतें कह्यो **प्रात: पधारे ने निशाये आवे प्रीत नवी उपजावे**॥१४॥

(टिप्पणम्)

१.वृषभानुजा सो वृषभानजीकी पुत्री यह बात पद्मपुराण कृष्णजन्मखंडादिकमें प्रसिद्ध हे. और मुख्यस्वामिनीजी यह वामभागस्थ हें यातें प्रमोदरूप हें. याहीतें सर्वोत्कृष्ट आनन्दरूप हें. तासूं ''**मोदप्रमोदौ अपरिनिष्ठितपरिनिष्ठितौ आनन्दौ**'' या अणुभाष्यके अनुसारसु इहां टीकामें परिनिष्ठितानन्दरूप लिखे.

२.प्रभुनूकी हू तापनिवृत्ति परमभक्त करत हें. सो द्रष्टान्तपे ''**व्रजपशून् सह रामगोपै:**'' इत्यादि स्थलके श्रीसुबोधिनीमें श्रीमहाप्रभुनूने ''**हरेरपि हरिर् यदि**'' (सुबो.कारि.१०।१८।११।२६)इत्यादि निरूपण कियो हे.

३.''**नमो-नमस्ते अस्तु वृषभाय सात्वतां**''(भाग.पुरा.२।४।१४) या श्लोकमें ''**निरस्तसाम्यातिशयेन राधसा**'' (वहीं)या जगे 'राध:' शब्द करिके श्रीस्वामिनीजी कहे हें. ऐसे शिष्ट कहत हे. क्यों जो ऋग्वेदमें कहींक राध: ऐसो श्रीस्वामिनीजीको नाम कह्यो हे. यह बात भारत व्याख्याकार नीलकंठकृत मंत्रभागवत देखेसु स्पष्ट होत हे.

४.जे गोष्ठलीलामें दक्षिणभागस्थस्वरूप हें ते मोदरूप हें. याते टीकामें अपरिनिष्ठितानन्द कह्यो याको विशेष तात्पर्य आनन्दमयाधिकरणके भाष्यके विचार कियेते स्फुट होत हे॥१४॥

(भाषाटीका)

राधाजी सो मुख्य स्वामिनीजी तिनकी जो **अधरसुधा** ता बिना **पियु** श्रीकृष्ण तिनकुं **बीजुं कांई न भावे** सो और कछु आछो नहीं लगत हे. तहां यह शंका हे जो तब तो प्रभु इनको छोड़िके

और कहीं भी नहीं पधारत होयेंगे. ता शंकाकू दूर करत हें, जो **प्रात: पधारे** सो प्रात:काल आप गोचारणको पधारत हें. **ने निशाये** सो रात्रिको आवत हें, ऐसी जिनकी प्रीति हे तो वियोग क्यों सहत हें? जो प्रीति नवी उपजावे. सो ते नित्य नवीन अधिक प्रीति उत्पन्न करिवेके अर्थ ये लीला करत हें॥१४॥

(विवृति:)

अब प्रभु शयनभोग आरोगत हें ताको निरूपण करत हें.

मातानुं मन रंजवा व्हालो आरोग्या बहु स्वादेजी॥
सुगंध बीड़ी कर धरीने उठ्या नूपुरने नादेजी॥१५॥

(विवृति:)

अब यहां **यशोदाजीनुं मन रंजवा** ऐसे नहीं कह्यो सामान्य मातृ शब्द कह्यो यातें श्रीयशोदाजी और रोहिणीजी इन दोऊन्को सूचन कियो. इन दोईन्को मनरंजन करिवेंको. **व्हालो** सो प्यारे पुत्र वे. **आरोग्या बहु** [१]**स्वादे** बोहोत स्वादतें शयनभोग आरोगे इहां **आरोग्या स्वादे** ऐसे नहीं कह्यो बीचमें **बहु** शब्द कह्यो याते आप धीरे धीरे आरोगे और मातृसमर्पितभोग श्रीस्वामिनीजीके अधरामृततें हू स्वादु लाग्यो यह सूचन कियो. ता पीछे **सुगंध बीड़ी कर धरीने उठ्या नूपुरने नादे.** सुगंध जो बरास जायफल ईलायची प्रभृति जा ऋतुमें जैसी उचित होय तैसी ता करिके युक्त जो बीड़ी ताको श्रीहस्तमें लेके नूपुरको शब्द करत भये उठे. इहां आचमन नहीं कह्यो सो तो [२]संदंशन्यायतें अर्थात् सिद्ध भयो अथवा प्रभु शयनभोग आरोग चुके तब श्रीयशोदाजीने बीड़ी दीनि सो आप वाम श्रीहस्तमें लेके शय्यामंदिरमें श्रीस्वामिनीजीके पास पधारत हें फेर श्रीस्वामिनीजी आचमन कराय अपुने हस्तकमलतें बीड़ी आरोगावत हें. याहीते **बीड़ी कर धरी** ऐसे कह्यो आरोगी ऐसे नहीं कह्यो और लोकमें अत्यन्त उतावल

करत हें तब कहत हे ''जो उहां भोजन करत हो तो इहां आयके अचोईयो'' याहितें श्रीस्वामिनीजीके संयोगकी उतावल सूचन करी याको फलितार्थ यह जो अत्यन्त स्वादतें आरोगे ताते श्रीयशोदाजी श्रीरोहिणीजी कों प्रसन्न करिके पूर्णवात्सल्यरसकों अनुभव करायो फेर श्रीस्वामिनीजीकों पूर्णसंयोगशृंगारको अनुभव करायवेकों बेगि - बेगि शय्यामंदिरमें पधारत हें॥१५॥

(टिप्पणम्)

१.बहोत स्वादतें प्रभु अरोगत हें सो मातृचरणके स्नेहते आपको शयनभोग बहुत स्वादु लगत हे. सो ही श्रीभागवतमें **''जनन्युपहृतं प्राश्य स्वाद्वन्नम् उपलालितौ''**(भाग.पुरा.१०।१५।४६)या श्लोकमें दिखायो हे.

२.संदंश सो चीमटा जैसे दोई आड़ीसू चीमटाकों पकड़िवेते वाके बीचमें जो वस्तु होय सो आप ही ते पकड़ी जाय. तैसे इहां भोग अरोगिवेको और बीड़ी अरोगिवेकों वर्णन किये तातें बीचमें आचमन आप ही ते सूचित भयो॥१५॥

(भाषाटीका)

माता जो यशोदाजी तिनके **मनकु रंजवा** सो प्रसन्न करिवेकु **प्रभु** जो पूर्णपुरुषोत्तम श्रीकृष्ण ते **आरोग्या बहु स्वादे** नाना प्रकारके स्वादतें शयनभोग आरोगे. ता पीछे **सुगंध बीड़ा कर धरीने उठ्या नूपुरने नादे. सुगंध** जो ईलायची बरास प्रभृति तिन करिके सहित जो बीड़ा ताकु **कर** जो श्रीहस्तमें लेके **नूपुरके नाद**को ठमका करत **उठ्या** उठ बैठे. उठिके माताजीके संग पर्यंकमें पोढ़े. ता समें यशोदाजी नाना प्रकारके बालविनोद गावत हें, कहानी कहत हें और प्रभु हुंकारी देत हें. प्रभु पोढ़ि जात हें. तब श्रीयशोदाजी तो अपने गृहकार्यमें लगत हें. पीछे दिनभर काम करत हें ताते परिश्रम होयके ये हू पोढ़त हें॥१५॥

(विवृति:)

अब श्री यशोदाजीकु श्रीरोहिणीजीकु और श्रीस्वामिनीजीकु ही केवल

यथायोग्य सुख देत हे ऐसे नहीं. जा व्रजभक्तको जैसो मनोरथ ताको तैसो सुख देत हें यह सूचन करत भये गूढ़ जो शयनलीला ताको संक्षेपतें निरूपण करत हें.

सकल व्रजमां पोढ़िया व्हालो विविध रससुख दानजी॥
ए लीला मारे मन वसो जे भक्त मागे मानजी॥१६॥

(विवृतिः)

सकल व्रजमां कला करिके सहित जो सकल पूर्णचन्द्र ता करिके युक्त ऐसो व्रज जो नित्यलीलास्थान ताके विषे. अथवा कला जो कामशास्त्रोक्त कला ता करिके युक्त जे व्रजसुंदरीयें तिनको व्रज जो समूह तामें याको भावार्थ यह जो प्रभु पोढ़त हें. तब अनेक व्रजभक्त अनेक सेवा करत हें. चरणारविंद दाबवेकी पंखा करिवेकी इत्यादिक. अथवा **सकल** सो सब [१]व्रजमंड़ल तामें **पोढ़िया** सो पोढ़े याको भावार्थ यह जो व्रजमंड़लमें जितने व्रजभक्त तिनके सब मनोरथ पूर्ण करिवेको सबनको शयनलीलाके मनोरथानुसार सुख देत हें. येही अभिप्राय दशमस्कन्धमें "[२]**सुखं सुषुपतुर्व्रजे**" (भाग.पुरा.१०।१५।४६) या श्लोकमें निरूपण कियो हे. अब इतने वर्णनमात्रतें गोपालदासजीको शयनलीलाके दर्शन भये ताते प्रेमलक्षणा भक्ति उत्पन्न भई तातें कह्यो. **वालो** सो प्यारे और प्रभु कैसे हें **विविध रससुखदान,** विविध सो नाना प्रकारके रस जो शृंगाररस ताके सुखदान सो सुख देवेवारे. अब प्रातःकालतें सायंकाल पर्यन्तकी लीलानिरूपण करिके प्रार्थना करत हें. **ए लीला** सो जा लीलाके अभी मोकों दर्शन होत हे सो. **म्हारे मन वसो** सो मेरे मनमें सर्वदा बसो और **ते** सो नन्दालयकी बाललीलासो अब **भक्त** जो आपके सेवक मैं गोपालदास सो ये ही **मान** जो [३]सम्मान सो मांगत हूं अथवा [४]**मान** सो प्रमाण अलौकिक लीलोपयोगी इन्द्रिय सो मांगत हूं. याको भावार्थ यह जो आपने लीलावर्णन करायके जिह्वा सुफल करी और लीलाके दर्शन करायके चक्षु सुफल किये.

अब नित्यलीलामें मेरो प्रवेश करायके मेरे सर्वदेहको सुफल आप करो॥१६॥

(टिप्पणम्)

१.सब व्रजमंड़लमें आप पोढ़त हें सो श्रीभागवतमें "**संविश्य वरशय्यायां**" (भाग.पुरा.१०।१५।४६) या श्लोकमें दिखाये हें.

२.या श्लोकमें व्रजेत् या सप्तमीको अभिव्याप्ति अर्थ मान्यो हे तातें सब व्रजमें आप पोढ़े ऐसो श्रीसुबोधिन्यादिक ग्रन्थनको आशय हे.

३. मेरे हृदयमें लीलाको आविर्भाव होय ये ही सम्मान में मांगत हूं.

४. करणव्युत्पत्तिमें मान ऐसो इन्द्रियादिकनको नाम हे सो प्रस्थानरत्नाकर ग्रन्थमें श्रीपुरुषोत्तमजीने विवेचन कियो हे और भक्त मागे **मान** याको ऐसे हू अर्थ होत हे जो शयन भये पीछे भक्त जे व्रजभक्त ते **मान** सो प्रसादी पुष्पमाला चर्वित तांबूल प्रभृति सत्कार मांगत हें. ओर जे राजस भक्त हें. ते सखी स्नेहसों श्रीस्वामिनीजीके मानकी इच्छा करत हें. यह लीला मेरे मनमें बसो॥१६॥

(भाषाटीका)

सकल सो संपूर्ण व्रजमें अथवा सबरे व्रजमें **सकल** सो संपूर्ण तरुणी गोपी तिनके घर, **पोढ़िया** सो पोढ़े याको भावार्थ ये जो असंख्यात भक्त हें तितने असंख्यातरूप धारण करिके संपूर्ण व्रजमें पोढ़े. अब यहां पोढ़िके कहा कार्य कियो सो निरूपण करत हें. **विविध रससुखदान** विविध जो नाना प्रकारके रससंयोग-विप्रयोग भेद करिके वा रहस्यलीलोपयोगी रसदान करत हें और स्वसमागमरूपी जो असाधारण निरवद्य **सुख** ताको हू दान देत हें. **ए लीला मारे मन वसो** अब जो निजभक्तनको प्रभुने सुरतसमागम रससुखदान दियो ते ही भक्त आपसो प्रार्थना करत हें जो यह तुम्हारी रहस्यलीला रतिसमागम रमणात्मक हास्य-विनोदात्मक रसरूपलीला सो हमारे मनमें बसो. सो निरंतर हमारे हृदयमें स्थिर करिके स्थित रहो. **ते भक्त मांगे मान. ते** सो वे व्रजभक्त ये **मान** सो सम्मान आदरपूर्वक प्रभुनसो मांगत हें. अब जैसी ये एक रहस्य रसात्मकलीला वर्णन करी तैसी अनंत लीलानको सूचन करत हें॥१६॥

(विवृतिः)

अब फेर लीलान्को अनन्तपनो सूचन करत भये प्रेमपूर्वक प्रार्थना करत हें.

श्रीविट्ठल द्विजरूप तमारी लीला एणी पेरे झाझीजी॥
ओळव्ये केम चालशे जे प्रीत अमशुं बाझीजी॥१७॥

(विवृतिः)

अब आप कैसे हो? **श्रीविट्ठल** सो [१]नित्यलीलाविशिष्ट पुरुषोत्तम हो और कैसे हो? **द्विजरूप. द्विज** जे चन्द्रमा ता जैसो आनन्ददायक हे **रूप** सो सौंदर्य जिनको. अथवा **द्विज** जे ब्राह्मण तिनके विषे हे रूप जिनको. याको भावार्थ यह जो वेद भगवद्रूप हें ते ब्राह्मणके विषे रहत हें. अब वेदको भगवद्रूपत्व तो "[२]**वेदो नारायणः साक्षात्**" (भाग.पुरा.६।१।४०) इत्यादि वाक्यनूमें स्फुट हे. अथवा **द्विजरूप** सो वर्तमानकालमें ब्राह्मणस्वरूप जिनने धारण कियो हे ऐसे जे आप तिनकी. **लीला एणी पेरे झाझी. एणी पेरे** सो या प्रकारते लीला **झाझी** सो अनन्त हें याहिते. **ओळवे केम चालशे** उड़ाये कैसे चलेगो. उड़ावनो सो ठगनो. याको भावार्थ यह जो आपकी लीला तो अनन्त हे और हमको थोड़ीसी लीलाको थोड़ोसो अनुभव करायके उड़ावोगे सो नहीं चलेगो ताको हेतु कहत हें. **प्रीत अमशुं बाझी** प्रीत हमतें बंधी हे याको भावार्थ यह, जो प्रीततें बंधी जात हे सो वाको योग्य पदार्थ वाते छिपावे तो वह कृतघ्न होय. याते सर्वदा सर्वलीलान्को प्रत्यक्ष अनुभव हमकुं कराओगे. इहां हमकुं यह बहुवचन सब व्रजभक्तनूके अभिप्रायतें हे. याते गोपालदासजीको परोपकारित्व सूचित भयो. भगवदीयन्को ये ही लक्षण हे और प्रभुन्को प्रीतिबद्धत्व तो "[३]**वशी कुर्वन्ति मां भक्त्या**" (भाग.पुरा.९।४।६६) स्फुट हे और **ओळमे केम चालशे** ऐसो हू पाठ हे ताको अर्थ और टीकामें लिख्यो हे॥१७॥

षष्ठे श्रीविट्ठलाधीशैः कऽष्णरूपेण याः कृताः॥
संक्षिप्तावर्णितालीलाः प्रार्थिताश्च मुहुर्मुहुः॥६॥

(टिप्पणम्)

१.विट्ठल सो निःसाधनजनोद्धारकर्ता हें तातें पुरुषोत्तम यह अर्थ कियो हे और श्रीयुक्त हें यातें लीलाविशिष्ट यह अर्थ कियो.

२.षष्ठस्कन्धमें कह्यो हे जो वेद साक्षात् प्रभुन्को स्वरूप हे. अब वेदरूपसों प्रभु ही ब्राह्मणनूके हृदयमें तथा मुखमें बिराजत हें. ताहीतें ब्राह्मण सर्ववर्णनूतें उत्कृष्ट हे. सब देवतान्को निवासस्थान हे सो वेदादिकमें प्रसिद्ध हे. येही इहां टीकामें लिख्यो हे.

३.नवमस्कंधमें प्रभुनूने दुर्वासाको आज्ञा कीनि हे जो अन्याश्रयरहित भक्त मोको भक्ति करिके वश करि लेत हे. जैसे पतिव्रता स्त्री गुणज्ञ पतिको वश करत हे.

४.या रीतिसों षष्ठाख्यानको व्याख्यान करिके गोस्वामी श्रीजीवनजी महाराज या आख्यानको सब अर्थ संक्षेपसों एक श्लोकमें आज्ञा करत हें. या श्लोकको अर्थ श्रीगुसांईजीने पहिले श्रीकृष्णावतारमें जे लीलाएं करी ते ही या छठ्ठे आख्यानमें संक्षेपसों वर्णन कीनि. और फिरफिरके मांगी. इतने ऐसी आपकी अनन्तलीला हें. तिनको सर्वदा मोको अनुभव कराओ. ऐसे गोपालदासजीने प्रार्थना कीनि. अब या आख्यानके अर्थको दोहा.

श्रीविट्ठल पहिले करि जे नितलीला तेह।
कही षष्ठाख्यान कछू फिर वह मांगी नेह॥

(भाषाटीका)

हे श्रीविट्ठल! शुद्ध उत्तरदलाख्य विरहाग्निस्वरूप वृंदावनचंद वस्तुतः श्रीकृष्ण मूलगोस्वामी और **द्विजरूप. द्विज** जो परिपूर्ण अलौकिक उदयास्तभावरहित, न्यूनाधिकभावरहित अखंडरसात्मक पूर्णपुरुषोत्तमके मनको अधिष्ठाता विरहात्मक चंदरूप श्रीविट्ठल हें. अथवा वर्तमानकालमें आप द्विजरूप हो, ब्राह्मणरूप धारण किये हें ऐसे जो आप सबके मूल आधिदैविक अधिष्ठाता, तिनकी **लीला एणी पेरे झाझी** सो बहोत हें, असंख्यात हें. याको भावार्थ ये जो आपने ऐसे असंख्यात पूर्ण - भावात्मक

रूप धारण कियो हे और तिन रूपन् करिके अनेक लीला करत हो. अब या तुकते ये अभिप्राय सूचन कियो जो जैसे आपने नंदनंदन विरहाग्निरूप करिके व्रजसुंदरीन्को सर्वांग रसदान दियो, तैसे ही निज स्वतंत्र सर्व आधिदैविक संगम सुधापति, अनेक रूपन्के धारणकर्ता युगल स्नेहरससागर श्रीविट्ठल मूलगोस्वामी या पद करिके मेरे सकल मनोरथ पूर्ण करो. आपके चरणारविंद देखिवेकी इच्छा सदा, और आपके दर्शन करत तृप्त न होउं; आपको देखिके अत्यन्त सुख पाऊं. और आपके विरहात्मक रसरूप सुयश, ताको अहर्निश गान करूं. वारंवार आनंदकों प्राप्त होऊं. या रीतसूं तो दिवस व्यतीत करिके ता पीछे सांझकी वाट निहारुं. फेरि जब आप कृपा करिके मोकुं अपने निकट बैठारो, ता समें आपके श्रीमुखको निरखिके दोऊ नेन सिराउं. और ता पीछें आप मोसों आलिंगन चुंबनादिक रहस्यलीला करो और सुधारसको पान करावो. यद्यपि आप अपनी प्रियाके रसमें मग्न हो, परन्तु मैं भी आपके चरणारविंदकी दीन दासी हुं. तातें मेरी उपर कृपा करिके आप अपनो सर्वांग संगमसुधारसको दान दीजिये. ये प्रार्थना पूर्वलीलाके दृष्टांतपूर्वक करी ये सूचन भयो. अब ये प्रार्थना सुनिके श्रीविट्ठलेश प्रभु परीक्षार्थ गोपालदासजीतें आज्ञा करे जो ये प्रार्थना तुम रसात्मक पूर्णपुरुषोत्तमतें करो. गोपीनूकुं संपूर्णसुखदान तो वा स्वरूपने ही कियो हे. कदाचित् ऐसे आप आज्ञा करे ताको ये उत्तर देत हें. जो प्रथम तो यह बात मैं निश्चय ही जानत हों और या समें हू संपूर्ण गोपीनूकुं रतिसुखदान विरहदान तुमने ही नंदनंदन पूर्णपुरुषोत्तम विरहाग्नि करिके दियो हे और तुम्हारे रसरूप सुयशको गान वे व्रजसुंदरी करत हें. तातें मोकुं कछु या बातमें संदेह होय के गोपीनूकुं रसदान कोई स्वरूपने ही दियो हे. तो मैं दूसरे स्वरूपसों प्रार्थना करुं. प्राणप्रेष्ठ सर्वस्व पति श्रीविट्ठलेश तिनको छोड़िकें प्रार्थना क्यों करुं? और दूसरे मूल स्वरूप तो आप ही हो. ऐसे अनेक रूप धारण करिवेकी आपमें सामर्थ्य हें. ताते ऐसी रसरूपलीला तो तुम्हारी असंख्यात हें. ताते **ओळव्ये केम चालशे**

ते प्रीत अमशुं बाझी. अब हमसुं **ओळव्ये** नाम छिपाये कैसे चलेगी? क्यों जो प्रीत तो आपके या निजस्वरूपके विषे **बाझी** सो बांधी हे. याको भावार्थ ये जो लगाई हे. तो ये हमतें क्यों छिपावत हो? हमारी प्रीत तो आपतें ही बंधी हे. यातें हू हमारो अन्यरूपतें प्रार्थना करिवेकों कहा काम हे॥१७॥

इति श्रीजीवनलालजी महाराजकृत षष्ठाख्यान (विवृतिः) सम्पूर्ण

इति श्रीमद्वल्लभाचार्यमतवर्तिनामोक्षगुरु - स्वमातामातामह गोस्वामि श्रीव्रजवल्लभ चरणैकतानेनस्वपितृसकाशादेवंलब्धविद्येन गोवर्धनाशुकविनाकृतं षष्ठाख्यान व्याख्यानटिप्पणं संपूर्णम्

इति श्रीगोपालदासजी तिनके दासानुदास 'निजजनदास' विरचितं षष्ठाख्यान भाषाटीका सम्पूर्ण

(कुसुमप्रभा)

अनन्तदिव्यलीलाविशिष्टस्य श्रीनन्दराजकुमारस्य परब्रह्मत्वं, तस्यैव संयोगरसात्मकस्य परमफलत्वं च, नतु अद्वैतिशैवादि-परिकल्पित-निर्गुणचैतन्यद्रुहिणादीनाम् इत्यपि सूचनार्थं षष्ठाख्यानं श्रीमत्प्रभुचरणाः प्रारभन्ते : तत्र विशेषतः परमफलत्वं संयोगरसात्मकस्यैव श्रीमन्नन्दराजकुमार-स्यैव तस्यैतस्य निरूपणं प्राधान्येन क्रियते इति भाति.

पञ्चमाख्याने तावद् —

जे लीलामां अंगीकार करियो रे, तेनो सकल ताप निस्तरियो रे॥
जेनें श्रीविट्ठलनाथ विचारे रे, तेनें प्रगट पदारथ चारे रे॥५॥
उपरांत भजन फल आपे रे, व्रजमंडल स्थिर करी स्थापे रे॥
तेने देव मुनि सर्वे गाये रे, ते तो सर्वउपरांत सुहाये रे॥६॥
तेने काल-कर्म नव बाधें रे, यम ते शिर धनुष्य न सांधे रे॥
एवो मार्ग श्रीवल्लभवरनो रे, ज्यां नहि प्रवेश विधि-हरनो रे॥७॥
ज्यां नित्यरास बहुपेरे रे, मध्य नायक निरतत घेरे रे॥

ज्यां रत्नजटिततट सरिता रे, नवपल्लव भूमि हरिता रे॥८॥
ज्यां रत्नधातु गिरिराजे रे, वांजित्र विविध पेरे वाजे रे॥
ज्यां युवती-युथ बहुमांये रे, श्रीजी श्यामलवर्ण सुहाये रे॥९॥
एणी पेरे श्रीगुसांइजीने जाणो रे, जाणी अहर्निश गाइ वखाणो रे॥
जे जीव जाति (जात) होय कोइ रे, तेने तत्क्षण सर्वे सुख होय रे॥१०॥
सेवकजन दास तमारो रे, तेनो रूपवियोग निवारो रे॥

(कुसुमप्रभा)

इत्याद्यनेकवचनैः संयोगस्य परमफलत्वं प्रदर्शितम्. तत्र केषाञ्चिद् अस्मदीयानामेव महाभाग्यवतां भगवदीयानां रसिकमूर्धन्यश्रीहरिरायचरणानुगामिनां विप्रयोगस्यैव परमफलत्वम् इति स्वीकर्तॄणाम् आशंका स्यात् "कुतोवा एषां वचनानाम् इत्थम् अन्यथाव्याख्यानसाहसम्!" तन्निरसनार्थं संयोगरसात्मकस्यैव अनेकदिव्यनित्यलीलाविशिष्टस्य मुख्यत्वमिति तत्र चमत्कृत्याधायकदिव्यपरिरम्भणादि-युक्तस्य श्रीमन्नन्दसूनोरेव परमफलत्वम् इति उपक्रमोपसंहारषड्विधतात्पर्यलिङ्गैः अत्र षष्ठाख्याने निरूपयन्ति **सगुण** इति.

सगुण स्नेही शामळा व्हाला अहर्निश दर्शन आपोजी॥
परम सुख देवाने काजे व्रज मंडल स्थिर करी स्थापोजी॥१॥

(कुसुमप्रभा)

तत्र प्रथमवाक्ये श्रीमन्नन्दसूनोः विशेषणचतुष्टयं दत्तं : **सगुण सनेही शामळा व्हाला** इति. एतच्चतुष्टयमध्ये **सगुण सामला व्हाला** इति विशेषणत्रयं ब्रह्मवाद-भक्तिमार्गोभयपोषकम्. **सनेही** इति विशेषणन्तु केवलशुद्धभक्तिमार्गपोषकम् इत्येतत्तु सर्वसहृदयहृदयसाक्षिकम्.

निर्धर्मकनिर्गुणचैतन्यस्यैव परब्रह्मत्वम् इति अद्वैतिपरिकल्पितमतं समूलम् उन्मूलयितुं **सगुण** विशेषणम्. 'सगुण' इति विशेषणम् अप्राकृतसच्चिदानन्दात्मकानन्त-दिव्यगुणाभिप्रायकम्. धर्माणां क्रियाणां च पारमार्थिकी सत्ता शुद्धे ब्रह्मणि अस्ति इति प्रदर्शितम्.

शामळा इति विशेषणेन नवघनश्यामवर्णस्य श्रीमद्यशोदोत्सङ्गलालितस्यैव परब्रह्मत्वं नतु शिवविरिञ्च्यादीनां तेषान्तु गौरवर्णादिविशिष्टत्वं पुराणादिषु प्रसिद्धम्. न ते साक्षात् परब्रह्मस्वरूपा: किन्तु तदंशभूताएव इति एवं शिवादीनां परतत्त्वत्वं निराक्रियते. किञ्च **शामळा** इत्यनेन भगवत: पामार्थिक-स्वाभाविक-नवघनश्यामत्वं तथाविधस्वरूपस्य स्वेच्छया स्वसामर्थ्येन अवतारदशायां सर्वजनदर्शनार्हत्वम् इत्यादि यद् **"अथवा शून्यवद् गाढं व्योमवद् ब्रह्म तादृशम्"** (त.दी.नि.१।७५) इत्यत्र श्रीमदाचार्यचरणै: श्रीमत्प्रभुचरणै: च उक्तं तत्सर्वमपि संगृहीतम्. नवघनश्यामवर्णस्य पारमार्थिकत्वसूचनेन अद्वैतमतनिरासकत्वमपि एतद्विशेषणस्य अर्थात् सिद्धम्. परे ब्रह्मणि नीलमेघ-श्यामवर्ण-सत्ता-बोधनेन **"यदा पश्य: पश्यते रुक्मवर्णम्"** (मुण्ड.उप.३।१।३) **"य एषो अन्तरादित्ये हिरण्मय: पुरुष:... प्रणखात् सर्वएवसुवर्ण:"**(छान्द.उप.१।६।६)इत्याद्यनेक-श्रुतिसिद्धान्तर्याम्यंशावतारादि-गतहिरण्मयत्वादि-वर्णस्यापि पारमार्थिकत्वम् अनुक्तसिद्धम्. **"आत्मनस्तु कामाय सर्वं प्रियं भवति"**(बृह.उप.२।४।५) **"स आत्मा अन्तर्यामी अमृत:"** (बृह.उप.३।७।३), **"गौण: चेद् न 'आत्म'शब्दात्"** (ब्र.सू.१।१।५) **"अहम् आत्मा आत्मनां धात: प्रेष्ठ: सन् प्रेयसामपि"** (भाग.पुरा.३।९।४२) **"द्युभ्वाद्यायतनं 'स्व'शब्दात्"** (ब्र.सू.१।३।१) **"प्रेष्ठो भवान् तनुभृतां किल बन्धु: आत्मा"** (भाग.पुरा.१०।२९।३२) इत्यादिवच:सहस्रै: सिद्धं श्रीमन्नन्दसूनो: सर्वान्तरात्मत्वप्रयुक्तं निरवधिकप्रियत्वं सूचयितुं **व्हाला** इति विशेषणं दत्तम्. एतेन श्रीमन्नन्दसूनो: सर्वान्तरात्मत्वप्रयुक्तनिरवधिकप्रियत्वं साधितम्. समष्ट्यन्तर्याम्यादिष्वपि यत् प्रियत्वं **"द्वा सुपर्णा सयुजा सखायौ"** (मुण्ड.उप.३।१।१) **"हंसौ अहञ्च त्वञ्च आर्यौ सखायौ मानसायनौ"** (भाग.पुरा.४।२८।५४) इत्यादिश्रुतिभागवतवाक्यप्रतिपादितं तत् श्रीनन्दराजकु-मारसम्बन्धप्रयुक्तमेव इत्यपि साधितं सर्वान्तरात्मत्वस्य अत्रैव सिद्धत्वात्.

भक्तिमार्गपक्षेतु **सगुण** इत्यादिविशेषणत्रयाणां विगलितवेद्यान्तरदशापन्नै: सहृदयधुरीणै: अनुभूयमानं किमपि अनिर्वचनीयं तात्पर्यं विद्यते, तदपि श्रीकृष्णास्यस्वरूप-श्रीमदाचार्यचरण-श्रीमत्प्रभुचरणकृपाकटाक्षशालिनांसात्मक-

भक्तिमार्गीय-रसानुभवप्रतिबन्धक-सकलाघविनिवृत्तये नन्दव्रजस्त्रीणां पादरेणुम् अभीक्ष्णशो वन्दमानानाम् **"आसाम् अहो चरणरेणुजुषाम् अहं स्याम्"** (भाग.पुरा.१०।४७।६१) इत्येतादृशभावनानुसेविनां केषाञ्चन महाभागवतभग-वदीयानामेव कृते श्रीमत्पुष्टिमार्गगुरुभूत-श्रीगोपीजन-श्रीमदाचार्यचरण-श्रीमत्प्रभुचरणकृपाकटाक्षेणैव **"यो अन्त:प्रविश्य मम वाचम् इमां प्रसुप्तां संजीवयति अखिलशक्तिधर: स्वधाम्ना"** (भाग.पुरा.४।९।६)इति न्यायेन तद्दत्तसामर्थ्येनैव प्रकाश्यते :

सगुण इत्यनेन लीलारस-पोषकानिर्वचनीय-रसानुभवसाधक-मानादि-समये **"प्रिये चारुशीले! मुंच मयि मानम् अनिदानम्... सत्यमेव असि यदि सुदति! मयि कोपिनि देहि खरनखरशरघातम्... त्वमसि मम भूषणं त्वमसि मम जीवनं त्वमसि मम भवजलधिरत्नम्... स्मरगरलखण्डनं मम शिरसि मण्डनं, देहि पदपल्लवम् उदारम्"** (गी.गो.१०।१-७) इत्येतादृशसरसवचनै: श्रीमत्प्रिया-मानापनोदन-कर्तृत्वं **"सुघरतिया कौन वापे वारों राईलोन"-"जरीके जराइवेको"**(नि.प.खंडि.ललि., शय.अडा.) इत्यादिप्रकारक-रोषकटाक्ष-संभिन्नखण्डितानर्मवचनश्रोतृत्वं कदाचिद् दानलीला-वसरे **"कृपावलोकन दान दे... मो याचकको सन्मान दे"**(पद दानली.सारं.) इत्येतादृश-पुष्टिलीलाख्यापक-भृत्यवश्यताद्योतक-दैन्यभावयुक्तवचननिकुरम्बै: कृपावलोकनात्मकदानप्रतिगृहीतृत्वादिगुणानां पारमार्थिकी सत्ता बोध्यते इति दिक्. अत्र विशेषविस्तरस्तु श्रीगोपीपरिवृढ-पदपङ्कजपराग-रजोभिषिक्तै: रसिकमूर्धन्यै: श्रीमद्वाक्पतिकृपाबलेनैव ऊह्य:. श्रीमद्व्रजराजकुमारस्य रसाब्धित्वेन जीवस्य च रसाब्धिबिन्दुत्वेन श्रीमद्व्रजाधिपस्य पूर्णस्वरूपमाधुर्यानु-भव: इयत्तया कर्तुं न शक्यते. नहि स्वातिघनस्य सकलानुभव: चातकचञ्चुपुटेन कर्तुं शक्य:. एतत्तु परमभगवदीयै: श्रीमन्नन्ददासमहानुभावै: **"नन्ददास चातककी चौंचपुट सब घन कैसे समाय!"** (पद : शीतका.शय.अडानो."-स्याम सलोने गात है") इति पद्ये उक्तम्, तत् सर्वमपि **शामळा** इत्यनेन संगृहीतम्.

किञ्च **"अरे कारे रतनारे भौंरा वदनकमलके लोभी, फिरत**

परागहेत तबहीते वदनकलिकालोभी'' (पद : वसं.धमा.सिंधु.) इत्यस्मिन् पद्ये यद् उक्तं तदपि 'शामळा' इत्यनेन प्रदर्शितम्. त्वं ममैव प्रियः मामेव संयोगदानं कुरु, नान्यत्र गमनम् उचितं, मत्सौधएव निवासं कुरु, एतत्तु **''परसो जिन मनमोहन प्यारे आन अंगनाअंग, एक बोल बोलो नन्दन''-''रहिये मेरे ही महल अनत न जैये''**(पद : वसं.मंग.अग्रस्वा. , ख-सखा.सारं इत्यत्र उक्तं तत्सूचनार्थं **व्हाला** इति विशेषणम्. यथा **''तब वृषभानु-किशोरी हरि भरि लीने अंक, ता सुखकी शोभा कहा कहूं मानो निधि पाई हे रंक''**(पद : धमा.रायसो ''सकल कुंवर...'' १६) इत्यत्र **''मिलवेकी अकुलान''** (पद.होरीधमा.सारं.''एसो खेल होरीको'') इत्यत्र च विगाढानुरागसूचनम्. तथा **सनेही** इति विशेषणेन परस्परनिरतिशयस्नेहवत्त्वं सूचितम्. संवृत्तो विशेषणचतुष्टयार्थः.

प्रकृतम् अनुसरामः : **तेनो रूपवियोग निवारो** इत्यनेन यद् वियोगस्य निवारणकर्मत्वं सूचितं, तदेव अन्वयमुखेन निरूपयन्ति **अहर्निश दरशन आपोजी** इति. **अहर्निश** इत्यनेन क्षणमात्रमपि विप्रयोगस्य असह्यत्वं व्यञ्जितं भवति. संयोगस्य प्राप्तिरपि भगवत्कृपयैव तद्दत्तैव प्राप्यते, नात्र जीवकृतिसाध्यतालेशगन्धोऽपि एतदेव **''अलौकिकस्य दाने हि च आद्यः सिध्येद् मनोरथः''** (सेवाफ.१) इत्यत्र श्रीमदाचार्यचरणैः उक्तं तत्सूचनार्थं **आपो** इति. नच **''अलौकिकस्य दाने हि''** इत्यत्र **'अलौकिक'** पदेन विप्रयोगानुभवस्यैव ग्रहणम् इति वाच्यं, प्रस्थानभेदेन तथाग्रहणे बाधाभावेऽपि अनेकप्रस्थानसम्मतत्वात् संयोगानुभवस्यैव 'अलौकिक'पदेन ग्रहणम्. श्रुतिरपि इममेव अर्थं द्रढयति **''यमेव एष वृणुते तेन लभ्यः तस्य एष आत्मा विवृणुते तनुं स्वाम्''** (कठोप.१।२।२३) अस्यार्थस्तु : 'एष'=संयोगरसात्मकः श्रीनन्दराजकुमारः स्वदत्तदानप्रतिगृहीतृत्वेन अलौकिककृपाभाजनं यं जीवम् अंगीकरोति, तत्पुरतएव अयं परमात्मा 'स्वां'= संयोगरसात्मिकां तनूं प्रकाशयति, संयोगरसानुभवं कारयति इति अर्थः. अत्र 'स्वां तनूं प्रकाशयति' इत्यनेन संयोगरसप्राप्तिरेव विवक्षिता इति सूच्यते, अन्यथा 'तनूं प्रकाशयति' इत्यस्य स्वारस्यभंगएव स्यात्. नहि वियोगे तनोः प्राधान्येन प्रकाशो भवति अपितु

अन्तर्धानमेव. अतएव शुकाचार्यैरपि वियोगानुभवसमये **''अन्तर्हिते भगवति''** (भाग.पुरा.१०।२७।१) इत्यत्र 'अन्तर्हिते' इति प्रयोगः कृतः. नतु 'आविर्भूते' इति. तस्मात् संयोगस्यैव परमफलत्वं तदेव सुस्पष्टतया निरूपयन्ति **परम सुख देवाने काजे** इति. यद्यपि सुखरूपत्वं विप्रयोगानुभवस्यापि अतएव साहित्यरसिकानामपि विप्रयोगाभिलाषो अनेकेषु पद्येषु अवलोकनपथम् अवतरति तथापि तापक्लेशादिसंभिन्नसुखरूपत्वाद् न परमसुखरूपत्वं विप्रयोगानुभवस्य. यद्यपि भगवत्सम्बन्धि-विप्रयोगान्तःपाति-तापक्लेशादेः अलौकिकाधिकार्यनुभ-वगम्यत्वं किंवा परमकरुणाकटाक्षभाजन-कतिपय-दैवजीवानुभवगम्यत्वमेव अनुभूयते, तथापि तापक्लेशरूपस्य अनपायात् सर्वथा दुःखविधुरसुखरूपत्वन्तु संयोगस्यैव. अतएव सुखे 'परम'इति विशेषणं दत्तं श्रीमत्प्रभुचरणैः **परमसुख** इति. नहि भगवद्धामस्थितिम् अन्तरा भगवत्संयोगानुभवः शक्यः इत्यपि स्पष्टयितुं **व्रजमण्डल** इति लीलायाः नित्यत्वसूचनार्थं **स्थिर करि स्थापो** इति पूर्वस्मिन् पद्ये श्रीव्रजाधिपस्वरूपविषये यद्यद् उक्तं तत् सर्वमपि **''यस्य देवे परा भक्तिः यथा देवे तथा गुरौ''** (श्वेता.उप.६।२३) इति न्यायेन श्रीमत्प्रभुचरणस्वरूपविषयेऽपि भगवदीयश्रीगोपालदासाः अतिदिशन्ति **श्रीवल्लभकुंवर** इति. श्रीत्प्रभुचरणकृतत्वपक्षेतु **''स्वयमेव आत्मना आत्मानं वेत्थ त्वं पुरुषोत्तमः''** (भग.गीता.१०।१५) इत्यादिवाक्यैः स्वरूपस्य स्वातिरिक्तावेद्यत्वेन स्वीयजीवेषु स्वस्वरूपप्रकाशनम् आवश्यकम् इति मनसि निधाय स्वयमेव अतिदिशन्ति.

श्रीवल्लभ कुंवर कोडामणां तमारुं नाम निरंतर लीजेजी॥
रूप-सुधारस-माधुरी ते लोचन भरी भरी पीजेजी॥२॥

(कुसुमप्रभा)

कोडामणां इत्यनेन पूर्वपद्योक्तविशेषणचतुष्टयार्थः संक्षेपविधया श्रीमत्प्रभुचरणस्वरूपविषये पर्यवस्थाप्यते. अस्य शब्दार्थस्तु अतिसुन्दर इत्येव किन्तु तत्सौन्दर्यमपि न स्वरूपमात्रेण किन्तु स्वरूपतो गुणतो, लीलातो, भावत इत्याद्यनेकप्रकारकं सौन्दर्यं विवक्षितम् इति ज्ञायते. तेन

विशेषणचतुष्टयार्थपर्यवसानमपि श्रीमत्प्रभुचरणस्वरूपे सूचितं भवति. विप्रयोगानुभवसमयेऽपि धर्मद्वारा धर्मिसंयोगं प्रार्थयन्ति **तमारुं नाम निरन्तर लीजे** . साक्षात् संयोगं प्रार्थयन्ति **रूप-सुधारस-माधुरी** इति. **लोचन** इत्यनेन संयोगे साक्षात्त्वम् उपस्थाप्यते. **भरि भरि** इत्यनेन संयोगे पूर्णत्वमपि परिचाय्यते. पुनरपि लीलाविशिष्टप्रभोः संयोगं प्रार्थयन्ति.

ते पद क्यारे देखिशुं जे गोधन पूंठे धायेजी।।
व्रजसुंदरी मुखसुख पामीने वारंवार अघायेजी।।३।।

(कुसुमप्रभा)

ते पद क्यारे देखिशुं अलौकिक-सौकुमार्य-लालिमाद्यनेक-गुणगण-भूषितत्वेन अनिर्वचनीयां तां श्रीव्रजराजकुमार-चरणसरसीरुह-सुषमां स्मृत्वा उक्तं **ते** इति. किंवा मदगजराजवद् गमनपरिपाटीं मनसि आलोच्य उक्तं **ते** इति. यद्वा रासादिसमये विविधनृत्यानुकूलां चरणविन्यासपद्धतिं स्मृत्वा उक्तं **ते** इति. अथवा विविधबन्धादिषु चरणद्वारा प्राप्तम् अलौकिकानन्दानुभवं स्मृत्वा उक्तं **ते** इति. **क्यारे देखिशुं** इत्यनेन क्षणमात्रविलम्बासहिष्णुता प्रदर्श्यते. किञ्च तादृशावसरस्य **''शुभ पल छिन शुभ यह घरियां''** (पद.उष्णका.राजभो.सारं.''भले ही मेरे आये'') इत्यादिवत् परमशुभरूपत्वमपि प्रदर्श्यते. यद्यपि **''मधुराधिपतेः अखिलं मधुरम्''** (मधुरा.१) इति सिद्धान्ते मधुराधिपतेः सर्वाः लीलाः मधुरिमासीमातिशायिन्यः सन्ति. तत्रापि प्रातः गोष्ठतो गवां यदा वने नयनं तदापि खण्डिताद्यनुभवार्थं रात्रिविरहम् अनुभूयमानानां संयोगरसप्रेप्सूनां श्रीस्वामिनीनां साक्षात् संयोगरसप्राप्तिः भवति, तत्सामयिकगोचारणलीलायाः माधुर्यशिखरम् अधिरूढत्वेन साक्षात् संयोगप्रापिकात्वेन च. अतएव साक्षात् संयोगरसप्रेप्सु-भक्ताकांक्षा-विषयत्वं तल्लीलायाएव इति व्यञ्जयितुं **गोधनपूंठे** इति. **''हिहीहीर्हीकारान् प्रतिपशुवने कुर्वति सदा''** (परिवृढा.३) इत्यादिवत् निःसाधनफलात्मकत्वं द्योतयितुं **अघाय** इति.

सम्वृत्तो हि उपक्रमो अथ अभ्यासोपक्रम इतः आरभ्यते **व्रजसुन्दरी**

इति उत्तरदलं वारयितुं **मुखसुख** इति न्यूनतालेशस्यापि सत्तां वारयितुं **वारंवार अघाय** इति. गोचारणार्थं यदा भगवतो व्रजे गमनं भवति तदा स्वामिनीनां विप्रयोगानुभवो भवत्येव इति तत्सामयिकीं व्यवस्थाम् आहुः :

दिवसे सउ श्यामा मळी रसरूप तणो यश गायेजी।।
गोपबालकमंडली मध्य देखीने वारंवार सुख थायेजी।।४।।

(कुसुमप्रभा)

दिवसे सउ श्यामा मली इति. ननु संयोगस्य परमफलत्वप्रतिपादकप्रकरणे मध्ये विप्रयोगप्रतिपादनस्य का आवश्यकता इति चेद् **''मधुर वस्तु जो खाय निरंतर सुख तो भारी, पर बिच-बिच कटु अमल तिक्त अति ही सुखकारि''** (पद : नन्ददा.रासपं.२१) इति भगवदीयशिरोमणिनन्ददासोक्त्यनुसारेण संयोगे रसचमत्कृत्याद्याधिक्याधानार्थमेव विप्रयोगनिरूपणावश्यकता इति ब्रूमः. यदि संयोगरसानुभवमुख्यावसररूपे यामिनीसमये सकलसामग्रीसंवलिते उद्दीपके सति विप्रयोगप्रतिपादनं स्यात्, तदपि रसाभासएव स्याद् इति आशयेन आहुः **दिवसे** इति. पूर्णरसानुभवसाधक-चन्द्रमलयानिलाद्यभावोऽपि **दिवस** इत्यनेन व्यज्यते. स्वकीयाः परकीयाः सात्त्विकराजसादिभावयुक्ताः सर्वाअपि स्वामिन्यः इदमेव वासरकृत्यं कुर्वन्त्यो गुणद्वारा गुणिसंयोगं प्राप्नुवन्ति इति प्रदर्शनार्थं **रसरूप तणो यश गाये जी** इति. यदि परम्परयापि संयोगसत्ता न स्यात् तदातु एतासां जीवनमेव अशक्यं भवेत् कैतवरहितप्रेमयुक्तत्वात्. गाथायामपि उक्तं **''कैअव-रहिअं पेम्म णत्थि व्विअ मामि माणुसे लोए. अह होहि कस्स विरहो विरहे होत्तम्मि को जिअइ''** (गाथस.श.२।२४) इति सूचनार्थमपि **रस रूप तणो यश गाये** इति अन्तरंगगोपानामपि दूतादिकार्यसाधकत्वाद् अन्तरंगलीलामध्ये प्रवेशो विद्यतएव. ते यदा स्वामिनीनां पुरत आगत्य कथयन्ति *''हे व्रजसीमन्तिन्यः श्रीनंदराजकुमारो अमुकनिकुञ्चे विराजते. तेनैव आदिष्टा वयं यत् श्रीव्रजसीमन्तिनीनां पुरतो गत्वा वक्तव्यं अहो गोप्यः साक्षात् संयोगप्राप्त्यवसरेऽपि*

किमर्थं केवलं गुणावलम्बनं क्रियते यत्र श्रीनन्दराजकुमारो विराजते तत्रैव मध्याह्नभोजनादिकं गृहीत्वा गन्तव्यम्. व्रजाधिपोऽपि भवत्प्रतीक्षामेव करोति'' एवं कतिपयगोपबालकोक्त्यनन्तरं यदा श्रीगोप्यः श्रीव्रजराजकुमाराधिष्ठिते निकुञ्जे गच्छन्ति तदा अन्तरंगगोपबालकवेष्टितभगवत्स्वरूपदर्शनेन परमानन्दम् आप्नुवन्ति इति सूचनार्थं **गोपमण्डली मध्य देखीने** इति संयोगपरमफलत्वपरि-चायकोहि अयम् अभ्यासः **वारंवार सुख थाय** इति.

एवं मध्ये संयोगम् अनुभूय पुनरपि यदा वियोगानुभवः तदा ''**तव कथामृतं तप्तजीवनं**'' (भाग.पुरा.१०।२८।९) इति श्रीभागवतवचनेन गुणस्यापि ऐश्वर्यादिषड्गुणयुक्तत्वात् स्वरूपात्मकमेवेति कथञ्चिद् गुणावलम्बनं कृत्वा ''**त्वयि धृतासवः**'' (भाग.पुरा.१०।२८।१) इति न्यायेन भगवदर्थमेव स्वप्राणरक्षणं वासरनिर्वाहः च क्रियते इति आहुः :

वासर निर्वाह एम करे सखी सायंकाळे पेखेजी॥
अलक मुख खुररज लागी ते कमल भ्रमर विशेखेजी॥५॥

वासर निर्वाह इति. संयोगोचितसमये संयोगमेव प्रदर्शयन्ति **सायंकाले पेखे** इति **सायं** इत्यनेन संयोगसमयएव उपस्थाप्यते. रात्रिदिवससंश्लेषस्यैव सन्ध्यात्वाद् नास्मिन् समये विरहस्य औचित्यम् इति स्वरसेन आहुः **पेखे** इति. अलकाअपि सर्वदा संयोगम् अनुभूयमानाएव इति ''**वीक्ष्य अलकावृतम्**'' (भाग.पुरा.१०।२९।३९) इत्यस्य सुबोधिन्यां स्पष्टम्. अतो अस्मिन् प्रकरणे तेषामपि निरूपणम् आवश्यकम् इति आहुः **अलक** इत्युपमयापि संयोगमेव द्रढयितुं **कमल भ्रमर विशेखे** इति. अलकानां भ्रमरस्थानीयत्वं वदनस्य सरसीरुहस्थानीयत्वं, खुररजसो मकरन्दस्थानीयत्वम् एवम् अनया उपमयापि प्रणयिद्वयसंयोगएव प्रकाशितो भवति.

एवम् उपक्रमेण अभ्यासेन च संयोगस्यैव परमफलत्वनिरूपणम् अस्मिन् आख्याने कृतम् अतः परम् अर्थवादेन उपपत्त्या अपूर्वतया फलेन उपसंहारेण मध्यनिर्देशेन च अस्य व्याख्यानस्य संयोगपरमफलत्वस्यैव प्रतिपादकत्वम्

अवशिष्यते. तत्सर्वमपि यथावसरएव व्यक्तं भविष्यति.

गोप-बालक-मंडली मध्य रंग अनेक उपजावेजी॥
मत्त गजगति मलपतां ते श्रीगोकुलमां आवेजी॥६॥
लोचन भृंग पिये घणुं ते प्रगट मुख मकरंदजी॥
कमलपत्र शी आंखडी ते जोई जोई टाळ्यो द्वंद्वजी॥७॥

(कुसुमप्रभा)

उपपत्तिः इयम् अर्थवादोऽपि **गोपाल-बालक-मण्डली मध्य** इति. **लोचन भृंग पिये** इति च. विप्रयोगसमयेतु तापक्लेशरुदनदैन्यादेरेव अनुभवः. भगवानपि तत्समये तापक्लेशम् अनुभवति. एतत्तु श्रीनन्ददासमहानुभावैः ''**दीन ह्वै याचत प्यारी लेत 'राधे' आधो नाम... उनके कलप बीते तेरी घरी याम**'' (पद : शीत.शय.अडा.नन्द.''ए तेरी भ्रौंहकी मरोरनतें'') इत्यादिपद्यभागे उक्तम्. संयोगावसरेतु भगवानपि क्रीडारसमग्नानेकविधं मोदप्रमोदम् उत्पादयन्नेव संयोगदानार्थं गोष्ठं प्रविशति इति सूचनार्थं **गोपमण्डली मध्य** इति. मत्तगजगतिरपि उद्दीपनविभावएव निविष्टा संयोगे विशेषचमत्कृतिमेव अनुभावयति. एतत् सर्वं ''**कृष्णः कमलपत्राक्षः पुण्यश्रवणकीर्तनः, स्तूयमानो अनुगैः गोपैः साग्रजो व्रजम् आव्रजत्. तं गोरजश्छुरित-कुन्तल-बद्धबर्ह-वन्यप्रसून-रुचिरेक्षण-चारुहासं वेणुं क्वणन्तम् अनुगैः अनुगीतकीर्तिं गोप्यो दिदृक्षतदृशो अभ्यगमन् समेताः**'' (भाग.पुरा.१०।१२।४१) इति श्रीमद्भागवती-यपद्यद्वये उक्तं विशेषजिज्ञासायां ततो अवधेयम्. यदा भगवान् श्रीगोकुलम् आगच्छति तदा भगवन्मुखकमलमकरन्दपानं लोचनभृंगैः अत्यर्थं क्रियते. किञ्च प्रकटमुखमकरन्दपानन्तु संयोगएव इत्याद्यपि अर्थवादमुखेन सूचनार्थं **लोचन भृंग** इति. भृंगादिरूपकोक्तिरेव अर्थवादं प्रकटयति. कमलपत्र-सदृश-नयनदर्शनेन तापापगमोक्तिरपि अर्थवादद्योतिकैव. अत्र विशेषविस्तरस्तु ''**पीत्वा मुकुन्दमुखसारघम् अक्षिभृंगैः तापं जहुः विरहजं व्रजयोषितो अह्नि. तत्सत्कृतिं समधिगम्य विवेश गोष्ठं सव्रीडहासविनयं यदपांगमोक्षम्**'' (भाग.पुरा.१०।१२।-४३) इत्यस्मिन् श्लोके स्पष्टः. विशेषजिज्ञासायां तत्रत्या सुबोधिनी द्रष्टव्या.

ननु यत्र परमरसास्वादः तत्र तृप्तिः न भवति, तृप्तेः स्वल्पावज्ञाद्योतकत्वात्. अतिपरिचयाद् अवज्ञा या सा तृप्तिजन्यैव अतएव लोके "वयं तृप्ताः" इति व्यवहारो अवज्ञाप्रदर्शनार्थं दृश्यते. अत्रापि **"वारंवार अघाये"** इत्यनेन तृप्तिः उच्यतइति संयोगस्य परमफलत्वम् इति पक्षो असाधु इति चेद् न, तृप्तेः अवज्ञाद्योतकत्वमेव एतादृशराजाज्ञाभावात्. तर्हि पूर्वप्रदर्शितव्यवहारस्य का गतिः ? इति चेत् शृणु, लोके 'तृप्ति'पदप्रयोगः उभयथा दृश्यते. अपूर्णत्ववारणादिप्रसंगे स्वल्पे अवज्ञाप्रदर्शनावसरे च. तत्र प्रयोगभूयस्त्वं प्राच्यप्रकारएव. तत्प्रकारादरमेव कृत्वा **अघाय** इति 'तृप्ति'पदप्रयोगः श्रीमत्प्रभुचरणैः कृतः.

अतएव प्रथमप्रकारादरणमेव तत्र कार्यं, द्वितीयप्रकारार्थकतृप्तिस्तु न कदापि भवति इति आशयेन आहुः :

जोतां तृप्ति न ऊपजे प्रभु अधरसुधाररस पायेजी ॥
भुजलता भीडी भामिनी त्यारे दिवसताप बुझायेजी ॥८॥

(कुसुमप्रभा)

जोतां तृप्ति न उपजे इति. यद्वा केवलदर्शनमात्रेण न पूर्णतृप्तिः किन्तु यदा अधररसपानं तदैव पूर्णतृप्तिः इति आशयेन आहुः **जोतां तृप्ति न उपजे** इति. श्रीमन्नन्दराजकुमारसंयोगसुखस्य लोकविलक्षणत्वेन सर्वदा नूतनत्वमेव अवतिष्ठते. अतः साध्वेव उक्तं **जोतां तृप्ति न उपजे** इति. अत्र विशेषविस्तरस्तु श्रीमत्प्रभुचरणकृतप्रेमामृतटीकायां द्रष्टव्यः. मध्यनिर्देशेनापि प्रकृतसिद्धान्तमेव द्रढयन्ति **अधरसुधारस पाये** इति. अधरसुधामेव ददाति परिरम्भणादिकं न ददाति इत्येतादृशः कृपणो न अस्मत्प्रभुः किन्तु महोदारचेता. अतएव तत्क्षणमेव परिरम्भणमपि अनुभावयति इति आहुः **भुजलता भीडी भामिनी** इति. **भुजलता भीडी** इत्यनेन गाढपरिरम्भणं विवक्षितं भवति. तापापहारकत्वस्य तत्रैव अनुभूतत्वात्. श्रीमद्भागवतेऽपि **"तत्सत्कृतिं समधिगम्य विवेश गोष्ठं"** (भाग.पुरा.१०।१२।-

४३) इत्यत्रापि 'सत्कृति'पदेन परिरम्भणादिकमेव उक्तम्. किञ्च तस्मिन्नेव पद्ये **"तापं जहुः"** (भाग.पुरा.१०।१२।४३) इत्येतदपि उक्तम्. एतत्समभिव्याहारेण अस्मदाशयस्यैव दृढीकरणात्. गाथायामपि उक्तं **"नाव मणेइ णतहा चन्दनपंको विकामि मिहुणाणम्, जह दुस्सहे विगिह्ये अण्णोणालिंगसुहे ल्लीति"** ( ) एतत् सर्वं मनसि निधाय उक्तं **दिवस ताप बुझावे** इति. **बुझावेजी** इनेनैव वियोगस्य अपहार्यत्वेन परमफलत्वाशंकापि परिहृता. नहि परमफलस्य निवारणप्रतिपादनम् उपपद्यते.

एवं मध्यनिर्देशेनापि संयोगस्यैव परमफलत्वं परिचाय्य मध्यनिर्देशम् उपसंहरन्तः पुनरपि संयोगस्यैव पूर्णसुखरूपत्वप्रदर्शनेन तस्यैव परमफलत्वं न विप्रयोगस्य इति स्थूणाखननन्यायेन द्रढयन्ति :

पूरण सुख दई गोष्ठमां प्रभु आघेरा पांउ धारेजी ॥
यशोदाजी ले भामणां सुतने नीरांजन उतारेजी ॥९॥

(कुसुमप्रभा)

पूरण सुख दई इति. यद्वा पूर्वपद्येषु संयोगस्य अभ्यासस्तु दृश्यते किन्तु व्यक्ततया तस्य परमफलत्वसूचको अभ्यासस्तु न उपलभ्यतइति अरुचिनिरसनार्थं **पूरण सुख दइ** इति. प्रथमपद्ये "दर्शन आपो" इत्यनेन संयोगं प्रार्थ्य तस्यैव परमसुखरूपत्वम् उक्तम्. अष्टमपद्येऽपि **भुजलता भीडी भामिनीना दिवसताप बुझाये** इत्यनेन व्यक्ततया संयोगं प्रदर्श्य तस्यैव पूर्णसुखरूपत्वम् उच्यते अतो न विप्रयोगपरमफलत्वसम्भावनापि. **गोष्ठमां** इत्यनेन निःसाधनव्रजस्यैव एतादृशफलाधिकरणत्वं विवक्षितं भवति. एतत्फलस्य केवलं निःसाधनजनैकभोग्यत्वात्. साधनाभिमानवतान्तु एत्फलानुभ-वाशापि दूरापेतैव. **"नायं श्रियो अंग! उ नितान्तरतेः प्रसादः स्वर्योषितां नलिनगन्धरुचां कुतो अन्याः रासोत्सवे अस्य भुजदण्ड-गृहीतकण्ठ-लब्धाशिषां यद् उदगाद् व्रजवल्लवीनाम्"** (भाग.पुरा.१०।४४।६०) इत्यस्मिन् श्लोके श्रीसदृशपरमोच्चाधिकारिणामपि अस्य फलस्य अप्राप्तिः प्रदर्श्यते इति कृत्वा

सामान्याधिकारिणान्तु तत्प्राप्तिसम्भावनापि कुत:? "**अरि चल नवलकिशोरी गोरी भोरी होरी खेलन जाँय**" (पद.वसं.गोरी.नन्द.) इत्यस्मिन् पद्ये अयमेव अर्थ: श्रीनन्ददासमहानुभावैरपि उक्त:. "**शेष महेश सुरेश न जाने अज अजहूं पछताय, यह सुख रमा तनिक नहि पायो यदपि पलोटत पाँय, श्रीवृषभानसुतापद-अम्बुज जिनके सदा सहाय. यह रसमगन सदा जे तिनपे नन्ददास बली जाय**" (यथापूर्वोक्ते पद्ये). ननु नि:साधनस्य कथं फलप्राप्ति:? इति शंकां निवारयितुं **प्रभु** इति. एतेन सर्वसमर्थत्वम् अचिन्त्याद्भुतानन्तपारमार्थिकशक्तिमत्त्वं च विवक्षितमिति पूर्वोक्ता शंका विलीनैव. एतावता ग्रन्थेनतु शृंगाररससम्बन्धिभाववतीनां स्वामिनीनां परमफलत्वप्राप्तिविवेचनेन संयोगस्य परमफलत्वं द्रढीकृतम्. एवं शृंगाररससम्बन्धिसंयोगम् उपपाद्य इदानीं वात्सल्यसम्बन्धिसंयोगम् उपपादयितुम् अग्रिमग्रन्थारम्भ: **आघेरा पाउं धारे** इति. वात्सल्यरसभोक्तृभक्तसमाजमध्ये मातृचरणश्रीयशोदाया: प्राधान्यं द्योतयितुं **श्रीयशोदाजी ले भामणा** इति. श्रीमन्मातृचरणानां वात्सल्यभावयुक्तत्वाद् दृष्टिदोषादिवारणार्थं स्वसुतस्य नीरांजनं कुर्वन्ति इति उक्तं **सुतने नीरांजन उतारे.**

वस्त्रांचल मुखरज पोंछीने रूप सकल निहाळेजी॥
ऊभी थाय रोमावली कर कोमल अंग संभाळेजी॥१०॥

(कुसुमप्रभा)

नीराजनानन्तरं भगवन्मुखस्य गोरजश्छुरितत्वदर्शनेन कियान् श्रमो मत्सुतेन अनुभूत: इत्येवं मनसि आलोच्य तत्क्षणमेव मुखप्रोञ्छनं मातृचरणै: क्रियते इति आशयेन आहु: **वस्त्राञ्चल मुखरज पोंछीने** इति. यद्वा भगवन्मुखस्य पूर्णावलोकनन्तु रज:प्रोञ्छनानन्तरमेव, कपोलादे: रजसा प्रावृतत्वेन श्रीमुखपूर्णावलोकनन्तु तदपगमएव इति निश्चित्य स्ववस्त्राञ्चलेनैव स्वसुतमुखप्रोञ्छनं कुर्वन्ति मातृचरणा: इति आशयेन उक्तं **वस्त्रांचल मुखरज पोंछीने** इति. अनुष्ठितव्यापारफलम् आहु: **रूप सकल निहारे** इति. सकलरूपदर्शनानन्तरन्तु स्वसुतश्रमापनोदनार्थं प्राथमिकं मातृकृत्यम्

अनुतिष्ठन्ति **उभी थाय रोमावली कर कोमल अंग संभारे** इति **वस्त्राञ्चल** इत्यारभ्य **भोजनशालाये आवे** इत्यन्तम्.

अग्रिमग्रन्थस्तु पुष्टिमार्गीयसेवासरणिप्रदर्शक:. भगवत्सेवारसम् अनुभूयमानै: भगवदीयै: सुखेन ज्ञातुं शक्य इति कृत्वा न विशेषतो विवरणं क्रियते किन्तु तद्भागमध्यगत **सुन्दरी गृहकारजमिषे वळी निरखवाने आवे** इति पद्यार्धभागस्तु सर्वथा व्याख्येयइत्यत: तस्य व्याख्यानं क्रियते. ननु वात्सल्यरसानुभवप्रसङ्गे शृंगाररससम्बन्धिभावयुक्तभक्तानां क: सम्बन्धो यदि 'सुन्दरी'पदस्य स्वामिनीभावयुक्तश्रीगोपीजन इति अर्थो इह अभिप्रेतो न स्यात्. **सुन्दरी गृह कारज मिषे वळी निरखवाने आवे** इत्येतद्भागस्य "**मिस हि मिस आवत गोकुलकी नार घर नन्दमहरके. दीपक ले चली बाल बाटमें बडो कर डारे, फेर झुक झुक बयारको देत गार**" (पद : नित्य.गौरी.) इति पद्येन सह एकवाक्यता न सम्भवेत्. किञ्च **गृह कारज मिषे** इत्येतदंशस्वारस्यमपि पूर्वोक्तार्थएव रक्षितं भवति. नहि वात्सल्यभावयुक्तश्रीगोपीजनानां नन्दालयगमने गृहकार्यमिषेण गमनावश्यकता. तासाम् अन्यथा आगमनस्यापि सम्भवितत्वात्. अत: 'सुन्दरी'पदार्थस्तु श्रीस्वामिन्यएवेति कृत्वा कथं वात्सल्यप्रसंगे शृंगारप्रसंगौचित्यम् इति चेत् शृणु, "**तद् एजति तद् न एजति**" (ईशा.उप.५) इत्यादिश्रुतिवाक्यानुसारेण भगवान् विरुद्धधर्माश्रय: इति तु सर्वास्तिकप्रतिपन्नम्. भगवतो अचिन्त्याप्राकृत-दिव्यस्वरूपभूत-विरुद्धधर्माश्रयत्व-द्योतनाय मध्ये शृंगारप्रसंगोत्थिति: इति ब्रूम:. अतएव श्रीमद्भागवते निरोधस्कन्धैकादशाध्याये परिसमाप्तिश्लोकसुबोधिन्यां निलायनादि बाललीलास्वपि शृंगारसम्बन्धिनी लीला निरूपिता. श्रीमत्प्रभुचरणैरपि "**प्रेंखपर्यंकशयन...**" इति पद्ये "**तोकता वपुषि तव राजते दृशितु मदमानिनीमानहरणम्. अग्रिमे वयसि किमु भाविकामेऽपि निजगोपिकाभावकरणम्. व्रजयुवतिहृद्यकनकाचलान् आरोढुम् उत्सुकं तव चरणयुगलम्. तेन मुहुरुन्नमनम् अभ्यासमिव नाथ ते सपदि कुरुते मृदुल-मृदुलम्**" इत्येतत्पद्यद्वयमपि पूर्वाशयेनैव उक्तम् इति प्रतिभाति. अतो वात्सल्यप्रसंगेऽपि शृंगारनिरूपणम् अदोषायैवेति सर्वम् अनवद्यम्. एतेन "**मिस ही मिस**

आवत''इति कीर्तनेन सह एकवाक्यतापि सिद्धा. **''मेघै: मेदुरम् अम्बरं वनभुव:''** (गी.गो.१।१) इति जयदेवोक्तिरपि संगच्छते. ननु **भोजनशाळाए आवे** इत्यस्माद् अव्यवहितोत्तरं **राधा अधर सुधा विना हरिने बीजुं ते कांई नव भावे** इति पद्यन्तु असम्बद्धमिव प्रतीयते इति चेद् अनुपासितगुरो: एतद् वचनम्. एतत्पद्यद्वयस्य श्रीनन्दराजकुमारभोग्यसामग्रीसमर्पणसमय उभयविधभावनयैव समर्पणं कार्यम् इति प्रदर्शनार्थत्वस्वीकारेतु सर्वथा पूर्वग्रन्थभागसम्बद्धमेव एतत्पद्यद्वयम् इति अभ्युपगमस्यैव औचित्यात्. पुष्टिमार्गीयभक्तेषु श्रीस्वामिनीनां सर्वाधिकप्राधान्यस्य श्रीमातृचरणानामपि प्राधान्यस्य अनेकप्रमाणसिद्धत्वेन तद्द्वारा समर्पितमेव भगवान् अंगीकरोति. तत्रापि मातृचरणसमर्पितमपि भगवान् श्रीराधाधरसुधास्वादभावनया तत्प्रत्यंगचुम्बनभावनया वा अश्नाति इत्येतत्तु अभ्यस्यति **''प्राणनाथ: प्रियाप्रत्यंगचुम्बनम्''** ( ) इत्यादिश्रीमत्प्रभुचरणपद्येषु साहस्रीभावनादिग्रन्थेष्वपि निरूपितम्. किञ्च किञ्चिन्मातृसमर्पितं भोजनं मातृसमर्पितत्वप्रयुक्तत्वेनैव अश्नाति इति उभयप्राधान्यं भावनायां द्योतयितुं **श्रीराधा-अधरसुधा विना** इति. **मातानुं मन रंजवा** इति च. सेवासरणिज्ञातृमहानुभावै: सामग्रीसमर्पणसमये उभयविधभावनाया: प्रदर्शितत्वेन तेषाम् उपदेशानुसारेणैव उभयविधभावना कार्या. भक्तिमार्गे स्नेहवत्कृतोपदेशस्यैव नियामकत्वाद् इत्यादिसूचनार्थमेव एतत्पद्यद्वयम् इति सर्वम् अनवद्यम्. 'अधरसुधा'पदस्य उपलक्षणविधया प्रत्यंगोपलक्षकत्वं, **''प्राणभृत उपदधाति''** (पू.मी.जै.सू.१।४।१२।२३-२६) इतिवद् अधरसुधाया: अंगान्तर्गतत्वेन एतेन रूपेण प्रत्यंगस्य उपलक्षणविधया ग्रहणं भवति. **बीजुं ते कांइ नव भावेजी** इत्यनेन सर्वाधिकत्वं परमप्रियत्वं च प्रदर्शितम्. **मातानुं मन रंजवा वालो आरोग्या बहु स्वादे** इत्यनेन दृष्टिभक्षपक्षोऽपि अपास्त:. भगवद्गीतायाम् **''अश्नामि प्रयतात्मन''**(भग.गीता.९।२६) इति उक्तत्वात्. श्रीमद्भागवतेऽपि **''उच्छिष्टभोजिनो दासा''** (भाग.पुरा.११।६।४६) इत्युक्तिरपि दृष्टिभक्षपक्षविरोधिन्येव.

एवम् उपक्रमेण अभ्यासेन उपपत्त्या अर्थवादेन अपूर्वतया फलेन च, संयोगस्य परमफलत्वं न्यरूपि.

**सकल व्रजमां पोढिया व्हालो विविध रस सुख दानजी॥
ए लीला मारे मन वसो जे भक्त मागे मानजी॥१६॥**

(कुसुमप्रभा)

अत: परम् उपसंहारेण संयोगपरमफलत्वनिरूपणम् अवशिष्यते. अत: उपसंहारेणापि प्रकृतसिद्धान्तं निरूपयन्ति **सकल व्रजमां** इति. अत्र 'व्रज'पदेन व्रजस्थिता: श्रीस्वामिन्यो गृह्यन्ते, तासामेव एतत्सुखाधिकारित्वात्. किञ्च 'पोढिया' इत्यस्य स्वारस्यमपि 'व्रज'पदस्य स्वामिनी इति अर्थकरणएव सुरक्षितं भवति. अन्यथा 'सकल'पदप्रयोगवैयर्थ्यप्रसङ्गात्. यदि 'व्रज'पदेन व्रजस्थितवनोपवनानां ग्रहणम् इति उच्येत तदापि 'सकल'पदस्य अपेक्षितचमत्कृतिजनकत्वाभावएव. अतएव श्रीमद्भागवते **''सुखं सुषुपतु: व्रजे''** (भाग.पुरा.१०।१२।४६) इत्यत्रापि 'व्रज'पदस्य पूर्वोक्तार्थस्वीकारएव प्रदर्शित:.

**श्रीविट्ठल द्विजरूप तमारी लीला एणी पेरे झाझीजी॥
ओळव्ये केम चालशे जे प्रीत अमशुं बाझीजी॥१७॥**

'सगुण' इत्यारभ्य **'सकल व्रजमां पोढिया'** इत्यन्तेन ये-ये गुणा: या: च लीला: निरूपिता: तान् सर्वानपि श्रीमत्प्रभुचरणस्वरूपविषये गुणोपसंहारन्यायेन उपसंहरन्ति **श्रीविट्ठल** इति. 'विदा'=ज्ञानेन 'ठान्'=शून्यान् 'लाति' इति 'विठ्ठल' इति निरुक्त्या नि:साधनजनोद्धारकत्वलाभेन श्रीमद्व्रजाधिपस्य श्रीमत्प्रभुचरणानां च नि:साधनजनोद्धारकत्वं समानरूपेण अस्ति इति साधितम्. नि:साधनजनोद्धारकत्वकथनेन उपलक्षणविधया असाधनसुसाधनदु:साधनत्रिविधाधिकार्युद्धारकत्वमपि श्रीमत्प्रभुचरणस्वरूपे अस्ति इति प्रदर्शितम्. श्रीमदाचार्यचरणानान्तु दैवोद्धारप्रयत्नात्मत्वमेव. श्रीमत्प्रभुचरणान्तु श्रीनन्दराजकुमारवत् सर्वोद्धारप्रयत्नात्मत्वम् अस्ति. **''निभृतमरुन्मनोऽक्षदृढयोगयुजो हृदि यद् मुनय उपासते तद् अरयोऽपि ययु: स्मरणात्. स्त्रिय उरगेन्द्रभोगभुजदण्डविषक्तधियो वयमपि ते समा: समदृशो अंघ्रिसरोजसुधा:''**

(भाग.पुरा.१०।८४।२३) **"गोप्यः कामाद् भयात् कंसः द्वेषात् चैद्यादयो नृपाः"** (भाग.पुरा.७।१।३०) इत्यत्र यथा श्रीमद्यदुकुल-जलधि-दिव्यमुक्तामणेः असाधनादित्रिविधजीवोद्धारकत्वं प्रसिद्धं, तथैव श्रीमत्प्रभुचरणानामपि त्रिविधजनोद्धारकत्वं प्राचीनवार्ताग्रन्थेषु सुप्रसिद्धम्. अत्रापि **"सरस कीधां जे हुता प्रेत पाषाण. हतित पतितनुं जुओ तमे प्रत्यक्ष ऐंधाण"** (नवाख्या.८।७) इत्यत्र एतदेव सर्वोद्धारप्रयत्नात्मत्वं न्यरूपि. विशेषजिज्ञासायां प्राचीनवार्तासाहित्यम् अवलोकनीयम्. एतत्स्वरूपस्य साधारणाधिकारिणां पुरतो अप्राकट्ये हेतुम् आहुः **द्विजरूप** इति गुणोपसंहारं सूचयति **एणी पेरे** इति साधारणाधिकारिणां पुरतो अस्य प्राकट्यं भवतु वा न किन्तु स्वीयजनेषु एतत्स्वरूपप्रकाशनम् आवश्यकमेव इति आहुः **ओळव्ये केम चालशे** यदि अस्मासु एतत्स्वरूपस्य प्राकट्यं न करोति चेत्, तर्हि पुष्टिमार्गीय-जीवाविर्भाव-वैयर्थ्यमेव स्यात्. वयमपि **"अक्षण्वतां फलम् इदं न परं विदामः"** (भाग.पुरा.१०।१८।७) इति व्रजसीमन्तिन्युक्त्यनुसारेण स्वरूपात्मकफलाकाङ्क्षिणएव, पुष्टिमार्गे भगवदाविर्भावस्य संयोगरसानुभवस्यैव फलत्वात्. श्रीमदाचार्यैरपि एतदेव उक्तं **"भगवानेव हि फलं स यथा आविर्भवेद् भुवि"** (पु.प्र.म.१७) इति. टिप्पण्यां श्रीमत्प्रभुचरणोक्तिरपि पूर्वप्रदर्शितसिद्धान्तानुकूलैव : **"स्वामिनिनां हि भगवतो बहिःप्राकट्यमेव अभीष्टं तदैव ईश्वरवादो अन्यदा शून्यवादः इति"** (सुबो.टिप्प.१०।२६।०।७) इति. वयन्तु तत्रापि स्वीया इति प्रदर्शनार्थं **प्रीत अमशुं बांधी** इति.

इति श्रीप्रतिक्षणनिकुञ्जस्थरासलीलासुपूरित-शुद्धाद्वैतब्रह्मवादाङ्गि-
शुद्धपुष्टिभक्तिमार्गप्रतिष्ठापकपरमाचार्यजगद्गुरुश्रीवल्लभाचार्य-
वंशोद्भवनमन्नृपतिमण्डलीमुकुटताण्डवमण्डितचरणगोस्वामिश्री-
गोकुलनाथाचार्यात्मजेन श्रीमन्महाप्रभुश्रीमत्प्रभुचरणकृपा-
कटाक्षैकजीवितेन श्रीनन्ददासादिमहानुभावभगवदीय-
चरणरजोभिषेकसमासादित-सकलपुरुषार्थेन
करुणामूर्तिश्रीकुसुमप्रभागर्भसंभवेन
गोस्वामिदीक्षितेन विरचिता
इयं कृतिः

(विवरणम्)

[प्रार्थनैकेन पद्येन गुरुः प्रार्थ्यो हि विठ्ठलः॥
यतस्तस्य हि धर्मोऽन्तर्व्रजावस्थापनं सदा॥१॥
''भगवानेव हि फलं स यथाविर्भवेद् भुवि॥
गुणस्वरूपभेदेन तथा'' पुष्टौ फलं भवेत्॥२॥
आचार्यचरणोक्तं यद् गुणरूपप्रकाशनम्॥
व्रजभूमौ भगवतः श्रीकृष्णस्येति प्रार्थना॥३॥
''सर्वदा सर्वभावेन भजनीयो व्रजाधिपः॥
स्वस्यायमेव धर्म''स्तु तत्राधिकरणं व्रजः॥४॥
तेनात्र षष्ठाख्याने हि मन्वन्तरविबोधके॥
विवक्षितोऽभिलषितोऽत्र स्वधर्मो व्रजभूमिगः॥५॥]

सगुण सनेही श्यामळा व्हाला अहर्निश दर्शन आपो जी॥
परम सुख देवाने काजे व्रजमंडल स्थिर करी स्थापो जी॥१॥

(इति पुष्टिसम्प्रदाये व्रजाधिपभजनरूपधर्माधिकरणभूतव्रजमण्डलस्थापनाय गुरोः प्रार्थनम्)

(विवरणम्)

[प्रार्थ्ये गुरौ हि सामर्थ्यं नामरूपाश्रितोद्धृतेः॥
वाक्श्रोत्रयोः नेत्रयोश्च व्यापारेण समाश्रयः॥६॥]

श्रीवल्लभकुंवर कोडामणां तमारुँ नाम निरंतर लीजे जी॥
रूप-सुधारस-माधुरी ते लोचन भरी-भरी पीजे जी॥२॥

(इति भगवल्लीलाकथयोः हृदि स्थिरस्थापनार्थं सर्वात्मना गुर्वाश्रयः)

(विवरणम्)

[सार्धत्रयोदशैः पद्यैः कृष्णलीलाकथापरैः॥
नित्यलीला व्रजे यासीद् हृद्याविर्भावनाय वै॥७॥
निरुद्धता या गोपीनां यशोदोत्संगलालिते॥

सद्धर्मो भजनं भक्तगेहे तद्भावभावना॥८॥
मनोरथस्य तस्यापि साध्यसिद्धविभेदतः॥
सद्धर्मे ह्यधिकारित्वं समेषां च कवेरपि॥९॥
कृतातो नित्यलीला या नन्दगेहे व्रजौकसैः॥
सार्धं कृष्णेन तद्भावनातः सेवाधिकारिता॥१०॥
सेवाकथान्यतरयोर् अंगत्वमनुकल्पता॥
विकल्पताचारम्भेऽनारम्भेऽशक्यतयापिच॥११॥
तस्माल् लीलाकथायां हि कवेर्भावो निरूपितः॥
आत्मप्रार्थ्यतयाख्याने चैतस्मिन् प्रभुसंनिधौ॥१२॥
यदप्युक्तं ''सर्वदैव दर्शनं देहि''हेतुकम्॥
संयोगएव परमं फलं प्रभुमतं त्विह॥१३॥
तत्रापि ललिते स्तोत्रे यदुक्तं तैरपि स्वयम्॥
''प्रायो न दर्शनापेक्षा यत्स्वयं तद्रसात्मकम्॥१४॥
प्रियाहृदयनेत्रेषु निरुद्ध''इति वर्णने॥
ततः संयोगानुभूतेः प्रार्थनं गमकं नहि॥१५॥
ततस्तु पितृचरणानां संयोगफलवादिनाम्॥
व्याख्या त्वप्रकृता भाति रूपाकांक्षाविभेदतः॥१६॥
''भगवान् व्यनक्ति स्वगतिं ह्याचार्यवपुषे''ति यत्॥
श्रीमद्भागवते प्रोक्तं स्वगुरोस् तत्त्वदर्शनम्॥१७॥
तेनैवमत्र संयोगविप्रयोगौ फलात्मकौ॥
नाभिप्रेतौ मतौ पित्राज्ञप्तचिन्तापरस्य मे॥१८॥
''एषह्येवानन्दयाति''श्रुत्या सर्वरसात्मके॥
वात्सल्यसख्यशृंगारभावानां योजनं मतम्॥१९॥
सर्वेऽपि द्विदलात्मानो ह्यन्योन्यविरहात्मकाः॥
''ज्ञानन्तु गुणगानं हि परोक्षे तत् प्रतिष्ठितम्॥२०॥
प्रत्यक्षे भजनं श्रेष्ठं रात्रौ च दिवसे तथा''॥
गोपानां गोपिकानां च संयोगविरहौ तथा॥२१॥
तत्सेवाध्यानरूपौ हि चक्रवत् क्रामिणौ फले॥]

ते पद क्यारे देखिशुँ जे गोधन पूँठे धाये जी।।
व्रजसुंदरी-मुख-सुख पामीने वारंवार अघाये जी।।३।।

(इति वात्सल्यसंयोगरसभावना)

दिवसे सहू श्यामा मळी रसरूप तणो यश गाये जी।।
गोपमंड़ळी मध्य देखीने वारंवार सुख थाये जी।।४।।
वासरनिर्वाह एम करे सखी...........।।

(इति गोपिकानाम् स्वबाह्यशंगाररसात्मकविप्रयोगे गोपानां सख्यरसात्मकबाह्यसंयोगस्य आन्तरभावना)

.............सखी सायंकाळे पेखे जी।।
अलक मुख खुररज लागी ते कमल भ्रमर विशेखे जी।।५।।
गोपबालक मंड़ली मध्य रंग अनेक उपजावे जी।।
मत्त-गजगति-मलपताँ ते श्रीगोकुलमां आवे जी।।६।।
लोचनभृंग पीये घणुं ते प्रगट मुखमकरंद जी।।
कमलपत्र शी आंखड़ी ते जोई-जोई टाळ्यो द्वंद्व जी।।७।।
जोतां तृप्ति न ऊपजे प्रभु अधरसुधाररस पाये जी।।
भुजलता भीड़ी भामिनी त्यारे दिवस ताप बुझाये जी।।८।।

(इति गोकुलस्थगोपगोपीनां सख्यशृंगारसंयोगयोः लीलाभावना)

पूरणसुख दई गोष्ठमाँ प्रभु आघेरा पाँउ धारे जी।।
यशोदाजी ले भामणाँ सुतने राई-लूण उतारे जी।।९।।
वस्त्रांचल मुखरज पोंछीने रूप सकल निहाळे जी।।
ऊभी थाय रोमावली कर कोमल अंग संभाळे जी।।१०।।
करी पेरे-पेरे वारणा सुतने सदनमां पधरावे जी।।

(इति वात्सल्यभावे मातुः यशोदायाः यः स्वसुतदर्शनलालनसंयोगः तद्भावना)

[श्रुतीनां हि प्रमेयोऽयं भक्तगेहे विभावितः।।२२।।

प्रमाणैर्नावगम्योऽतो गेहकार्यमिषेण हि।।
भगवत्सेवनं कार्यं नित्यं नैमित्तिकं तथा।।२३।।
तादृश्याः भावनायाश्च मनोरथसुधावनम्।।
येषु सञ्जायते तेषु पुष्टिभक्त्यधिकारिता।।२४।।
सेवनाया अशक्यत्वे परिचर्यामिषेण हि।।
"अतः स्थेयं हरिस्थाने तदीयैः सह तत्परैः।।२५।।
अदूरे विप्रकर्षे ही"ति सिद्धान्तबोधनम्।।]

सुंदरी गृहकारज मिषे वळी निरखवानें आवे जी।।११।।
उष्णोदक सोंधो भेळीने अंग अंगोळ करावे जी।।
अंगवस्त्र करी स्वच्छ वपुने पाछे तेल लगावे जी।।१२।।
अनेक सुगंध वसन ने भूषण फूल अंबोड़े फावे जी।।
ठण्ठणतो व्हालो लाड़कड़ो ते भोजनशाळाए आवे जी।।१३।।
राधा-अधर-सुधा विना पियुने बीजुं ते कांई नव भावे जी।।
प्रातः पधारे ने निशाए आवे व्हालो प्रीति नवी उपजावे जी।।१४।।
मातानुं मन रंजवा व्हालो आरोग्या बहु स्वादे जी।।
सुगंध बीड़ी कर धरीने उठ्या नूपुरने नादे जी।।१५।।
सकल व्रजमां पोढ़िया व्हालो विविध रस सुखदान जी।।

(इति क्रियारूपभक्तिमद्गेहस्थभजनं प्रमाणरूपभक्तिमतां किञ्चिदशक्यमपि तत्परिचर्यापरम्परया शक्यमपि भवतीति भावनानिरूपणम्)

(विवरणम्)

[एकेन स्वीयसर्वेषु भक्तेष्वपि हरेस्तथा।।२६।।
निरुद्धतायाः सिद्धिर्हि विठ्ठलानुग्रहाद् भवेत्।।
प्रार्थ्योपसंहृतिस्त्वत्र सार्धैकेनैव द्योतिता।।२७।।
साधनीकृत्य पुष्टानामाचारं निखिलेष्वपि।।
व्रजमण्डललीलायाः प्राकट्यं फलमीरितम्।।२८।।
षष्ठाख्याने पूर्वोत्तरभावरूपा हि संगतिः।।]

ए लीला मारे मन वसो जे भक्त मागे मान जी।।१६।।
श्रीविट्ठल द्विजरूप तमारी लीला एणी पेरे झाझी जी।।
ओळव्ये केम चालशे जे प्रीत अमशुं बाझी जी।।१७।।

(विवरणम्)

[दर्शने प्रातरारभ्य मनोरथसमुद्भवः।।२९।।
सञ्जायते हि रागेण भक्तेषु परजेन हि।।
एवं विवक्षितं भाति प्रभूणां चेत्कृपा मयि।।३०।।]

इति श्रीगोपालदासकृतस्य श्रीवल्लभाख्यानान्तर्गतषष्ठाख्यानस्य
प्रमाणखण्डे पुष्टिसम्प्रदायसद्धर्मलीलाप्रकारवर्णनपरे
गोस्वामिश्रीदीक्षितात्मजेन श्याममनोहरेण कृतं
विवरणं सम्पूर्णम्

॥ सप्तमवल्लभाख्यानम् ॥

(राग : केदारो/सामेरी)

(साम, गप, मप, धपम, नि ध सां, मं ग, मरेसा)

(सा रे मप ध सां, सांनि ध पमगरे सा)

आप सेवा करी शीखवे श्रीहरि॥
भक्तिपक्ष वैभव सुदृढ कीधो॥
आपनी लीला ते वदन पोते धरी॥
उच्चार आनंद ते अधिक दीधो॥१॥
वेददधि मध्य नवनीत जे भजनरस॥
मथित माधुरी जीवे श्रवण पीधो॥
तक्रसम कर्मपथ स्नेह-रस-हीन जे॥
श्वेत जाणी विमुख ताणी लीधो॥२॥

(व्रजाभरणीया)

श्रीनंदनंदन होईके लीला करी सो वर्णन प्रथम कडुआमें कर्यो. अब श्रीवल्लभनंदन होईके लीला करी ताको वर्णन या कडुआमें करत हें : आपु श्रीगोवर्धननाथजीकी सेवा करिके भक्तनकों सिखाई, शिक्षा करें. या प्रकारसों सेवा करें सो आपुश्री हरि हें, हरिके हरि भये. और सहां एतन्मार्गीय हरिके हरि होई सेवा करें या शिक्षाते **भक्तिपक्ष** स्नेहमार्ग ताको **वैभव सुदृढ** उत्तम प्रकारसों दृढ करें. सेवा करिके यह कृतिसों दृढ करें और वचनसो दृढ करे सो कहत हें. आपुनी लीला **वदनरूप धरि** श्रीवल्लभाचार्यजी वागधीश होईके द्विजतनु धरी

